# संस्कृत-वार्ता:

**दिनाङ्क :- 18.06.2024** **सायम् - 06:20**

## आदौ-मुख्यवार्ता:

- प्रधानमन्त्री नरेन्द्र मोदी अद्य प्रधानमन्त्री कृषक सम्मानिधे: सप्तदशभागांशरूपेण विंशतिसहस्रकोटिरूप्यकाणि लाभार्थिभ्य: प्रदत्तवान्।
- भारत-अमेरिका देशयो: मध्ये महत्त्वपूर्णोदीयमान-प्रौद्योगिकी-विषये चर्चा जाता देशद्वयं महत्त्वपूर्ण-प्रौद्योगिकी-क्षेत्रेषु सहभागितां करिष्यत:।
- देशानाम् आर्थिक-स्थिते: आकलनं कर्तृणा फिच इत्यनेन समवायेन वर्तमान वित्तवर्षाय भारतस्य सकलगृहयोत्पादस्य अनुमानं प्रतिशतं सप्त मितात् समेध्य सप्त दशमलवाधिक द्वि प्रतिशन्मितं कृतम्।
- भारतीय-चलचित्र-निर्मात्रि विनोद-गनात्रा इत्यस्मै नेल्सन मंडेला लाइफ टाइम अचीवमेंट अवार्ड इति सम्मान: प्रदत्त:।
- तोमर-क्षेपक: नीरज चोपडा अद्य फिनलैण्डस्य तुर्कु नगरे पावो नूरमी क्रीडाङ्गणे विश्व एथलेटिक्स कॉनिटनेंटल टूर इति स्पर्धायां प्रतिभागं करिष्यति।

### प्रधानमन्त्री-उत्तरप्रदेश-बिहार:

प्रधानमन्त्री नरेन्द्रमोदी अद्य उत्तरप्रदेशस्य वाराणसीनगर्यां प्रधानमन्त्री-किसान-सम्मान-निधि-योजनान्तर्गतं विंशति-सहस्र-कोटि-रुप्यकाणां सप्तदशतमं देयराशिं लाभार्थिभ्यः प्रदत्तवान्। देयराशे: धनं प्रत्यक्षतया षड्विंशति-लक्षाधिक-नव-कोटि: लाभार्थि-कृषकाणां वित्तकोषेषु सम्प्रेषितम्। एतस्मिन् कार्यक्रमावधौ श्रीमोदी स्वयं-साहाय्य-समूहानांत्रिंशत्सहस्राधिकाभ्य: महिलाभ्य: कृषि-सखी-इत्यस्यान्तर्गतं प्रमाणपत्राण्यपि वितरितवान्। प्रधानमन्त्री नरेन्द्रमोदी अद्य सायं श्रीमोदी दशाश्वमेध-घट्टे गङ्गा-आरार्तिक्यां समुपस्थितो भविष्यति। अनन्तरं प्रधानमन्त्री काशी-विश्वनाथ-देवालये पूजां दर्शनञ्च करिष्यति। श्वः प्रात: प्रधानमन्त्री बिहारस्य राजगीर-स्थले नालन्दाया: भग्नावशेषाणाम् अवलोकनार्थं तत्र गमिष्यति। एतदनन्तरं असौ बिहारस्य राजगीर-स्थले नालन्दा-विश्वविद्यालय-परिसरस्यापि उद्घाटनं विधास्यति। अत्रावसरे प्रधानमन्त्री तत्र एकां जनसभामपि सम्बोधयिष्यति।

### अतीज-डोभाल:

राष्ट्रिय-सुरक्षा-परामर्शद: अजीत-डोभाल: नव-दिल्लयां अमेरिकीय समकक्षेण जैक-सुलिवान इत्यनेन सह उदीयमान प्रौद्योगिकी क्षेत्रस्य द्वितीय-उपवेशनस्य अध्यक्षतां कृतवान्। गतदिने आयोजिते उपवेशने अजीत डोभाल: जैक-सुलिवान च आगामि राजनैतिक-प्रौद्योगिक-अनुबन्धस्य दृष्टिकोणं निर्धारितवन्तौ।

### अमेरिका भारत

अमेरिकया पुनरेकदा उक्तं यत् अमेरिकीय-सुरक्षा परामर्शद: जैक सुलिवान इत्यस्य भारत-यात्रया देश द्वयस्य मिथ: दृढ-सहभागिता अतोपि प्रबला भविष्यति। अनेन समृद्ध-हिन्द-प्रशान्त-क्षेत्रस्य निर्माण: भविष्यति। अमेरिकीय राष्ट्रपति-निवासे वार्ताहरान् सम्बोधयन् राष्ट्रिय-सुरक्षा-संवाद-परामर्शद: जॉन किर्बी अवोचत् यत् भारतम् अमेरिका च सर्वतो प्राचीनौ लोकतन्त्र-राष्ट्रौ विद्येते। अपि च देशद्वयस्य मैत्री अप्रतिमा वर्तते। तेन अमेरिकाया: राष्ट्रिय-सुरक्षा-परामर्शद: भारत-यात्रा-विषये उक्तं यत् यात्राया: उद्देश्यं देशद्वयस्य मध्ये प्रमुखक्षेत्राणां विस्तार: वर्तते।

### देशानाम् आर्थिक-स्थिते:

देशानाम् आर्थिक-स्थिते: आकलनं कर्तृणा फिच इत्यनेन समवायेन वर्तमान-वित्तवर्षाय भारतस्य सकलगृहयोत्पाद: अर्थात् जी.डी.पी. इत्यस्य वृद्धे: अनुमानं प्रतिशतं सप्त मितात् समेत्य सप्त दशमलवाधिक-द्वि-प्रतिशन्मितं कृतम्। फिच इत्यनेन समवायेन उपभोक्तृ व्यये उत्कर्षं, निवेशे च वृद्धिं निध्याय प्राक्तन् अनुमाने संशोधनं विहितम् अस्ति। आकलन-कर्तृ-समावायेन अद्य प्रख्यापिते वैश्विकार्थिक-आकलन-प्रतिवेदने ऐषम: वित्तवर्षाय वैश्विक-वृद्धि-दरानुमानम् अपि समेधितम्। प्रतिवेदनानुसारं यूरोपीयार्थव्यवस्थायां वृद्धे: संभावना एधितास्ति। चीनदेशं विहाय विश्वस्य समेधमान-विपणौ क्षेत्रीयावश्यकतायां वृद्धि: द्रष्टुं शक्यते।

**संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।**

**विनोद गनात्रा पुरस्कार:**

वैश्विक-ख्याति-प्राप्त-चलचित्र-निर्मात्रे विनोद गनात्रा इत्यस्मै तदीय योगदानाय दक्षिण अफ्रिकाया: **नेल्सन मंडेला लाइफ टाइम अचीवमेंट अवार्ड** इति सम्मान: प्रदत्त:। असौ प्रथम: भारतीय: संवृत्त: येन अयं पुरस्कार: प्राप्त:। बाल-चलचित्रे उल्लेखनीय-योगदानाय सप्तमे नेल्सन मंडेला बाल-चलचित्र-महोत्सवे स: अनेन प्रतिष्ठित-पुरस्कारेण सम्मानित:। विनोद-गनात्रा षड्त्रिंशत् राष्ट्रिय अन्ताराष्ट्रिय पुरस्कारै: सभाजित: अस्ति। दूरदर्शने प्रसारिताय **बैंगन राजा** इति बाल-कार्यक्रमाय असौ जानकीनाथ गौड़ पुरस्कारेण अपि सम्मानितो वर्तते।

**गृहमन्त्री मणिपुर-सुरक्षा**

केन्द्रीय-गृह-मन्त्रिणा अमित-शाहेनोक्तं यत् केन्द्र-प्रशासनं मणिपुरस्य समेषां जनानां सुरक्षां सुनेश्चेतुं पूर्णतया प्रतिबद्धमस्ति। मणिपुरे सुरक्षा-स्थितेः समीक्षायै नवदिल्ल्यां सम्पन्ने उच्च-स्तरीयोपवेशने गृह-मन्त्री अवोचत् यत् गृह-मन्त्रालयः शीघ्रं मैतेई अथ कुकी समूहाभ्यां सह संवादं करिष्यति। येन उभयोः पक्षयोः मिथः मतभेदः अपाकरिष्यते। केन्द्रीय-गृहमन्त्रिणा मणिपुरे सुख-शान्ति-प्रवर्तनाय रणनीतिक-रूपेण केन्द्रीय-बलानां नियुक्तिः सबलं प्रतिपादिता। तेनोक्तं यत् आवश्यकता विद्यते सति सुरक्षाबलानां नियुक्तौ वृद्धिमपि विधास्यते। श्रीशाहेन हिंसाचरणस्य रूपरेखा-निर्माण-कर्तृन् विरुध्य कठोर-कार्याचरणस्य अपि निर्देशः प्रदत्तः। सममेव उक्तं यत् केन्द्र-प्रशासनं मणिपुरे सुरक्षा-द्रढयितुं सक्रिय-रूपेण साहाय्यं विदधाति।

**प्रधानमन्त्री श्री नगरेयोग:**

प्रधानमन्त्री नरेन्द्रमोदी दशम अन्ताराष्ट्रिय-योगदिवस-समारोहे जून-मासस्य एकादशे दिने श्रीनगरे सहभागं करिष्यति। अस्मिन् वर्षे अन्ताराष्ट्रिय-योग-दिवसस्य विषयः वर्तते स्वस्मै समाजाय च योगः । केन्द्रीय आयुषमन्त्री प्रतापराव-जाधवः अद्य नव-दिल्ल्यां वार्ताहरान् संबोधयन् अवोचत् यत् विगतेषु वर्षेषु लक्षशो जनानाम् उत्साहपूर्ण-सहभागितया समुदायेषु योगस्य प्रबल-प्रभावः दृष्टः। अत्रावसरे तेन दृष्टिबाधित-जनानां सौविध्या ब्रेल लिप्यां सामान्य-योग प्रोटोकॉल पुस्तकस्य विमोचनं कृतम्। तेन योग विषये **प्रोफेसर आयुष्मान कॉमिक** इत्यस्य लोकार्पणम् अपि कृतम्। इदं पुस्तकं बालेभ्य: रुचिपूर्वकं योगाभ्यासे साहाय्यं करिष्यति।

**ऋतु संचेतना**

ऋतु-विज्ञान-विभागेन उत्तर-पश्चिम-पूर्व-भारतस्य कतिपय-क्षेत्रेषु निदाध-तापे अपचिति: अनुमितास्ति। आकाशवाण्या: वार्ता: प्रभागेण सह संवादे भारतीय-ऋतु-विज्ञान विभागस्य वैज्ञानिक: सोमा सेन रॉय: उक्तवती यत् पश्चिम-विक्षोभस्य अन्तर्गतं पञ्जाबस्य हरियाणाया: च क्षेत्रेषु चक्रवातेन ऊष्णतायां नैयून्यस्य सम्भावना विद्यते। तया उक्तं यत् आगामि द्वि-त्रि-दिनेषु पश्चिम-बङ्गालस्य उपहिमालयीय-क्षेत्रे अथ देशस्य पूर्वोत्तर-क्षेत्रेषु प्रबलवृष्टि: प्रवर्तिता भविष्यति।

**ग्राम-पंचायत-योग-दिवस:**

प्रधानमन्त्री नरेन्द्रमोदी ग्रामपञ्चायत-प्रमुखेभ्य: आग्रहं कृतवान् यत् ते योगस्य परिपक्व-धान्यानां च प्रसारं कृत्वा समग्र-स्वास्थ्यं जनान्दोलनत्वेन विधातुं कार्यं कुर्वन्तु। ग्राम-प्रधानेभ्य: लिखिते पत्रे प्रधानमन्त्रिणा प्रोक्तं यत् पंचायत-परिसरेषु, विद्यालयेषु, आंगनवाडि-स्थानेषु, सामुदायिक-स्वास्थ्य-केन्द्रेषु च योगाधारित-कार्यक्रमायोजनं जनेभ्य: युवभ्यश्च स्थायिरूपेण चिन्तारहित जीवनशैलीं स्वीकर्तुं प्रेरयिष्यति। ग्राम-पंचायतानां सर्वेषां निवासिभ्य: दशम अन्तर्राष्ट्रीय-योगदिवसस्य शुभकामनां पूर्वकं श्री मोदिना योगस्य वैश्विकप्रभाव: जनानां जीवने च अस्य सकारात्मकप्रभाव: प्रमाणरूपेण प्रकाशित:। अनेन स्वस्थ-राष्ट्र-निर्माणस्य दिशि प्रशासनस्य प्रयासा: समेधयिष्यन्ते।

**नीरज चोपड़ा तोमर**

तोमर क्षेप-स्पर्धायाम् ओलंपिक-विजेता विश्व-विजेता च नीरज-चोपडा अद्य फिनलैण्डस्य तुर्कु नगरे पावो नूरमी क्रीडाङ्गणे **विश्व एथलेटिक्स कॉन्टिनेंटल टूर** इति स्पर्धायां प्रतिभागं करिष्यति। अस्यां स्पर्धायां नीरज चोपड़ा जर्मनी देशस्य मैक्स डेह्निग इत्येनं सम्मुखी करिष्यति।

**।। इति वार्ता: ।।**